मार्कण्डेयपुराणम्

वेदव्यासः



81(78)

86(83)

षडशीतितमोऽध्यायः- ८६

ऋषिरुवाच

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ।

समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥८६.१ ॥

तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ।

सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥८६.२ ॥

हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ।

तामानय बलाद् दुष्टां केशाकर्षणविह्वलाम् ॥८६.३ ॥

तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः ।

स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥८६.४ ॥

ऋषिरुवाच

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ।

वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययो ॥८६.५ ॥

स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ।

जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥८६. ६ ॥

न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ।

ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥८६.७ ॥

श्रीदेव्युवाच

दैत्येश्वरेण प्रहितो बलवान् बलसंवृतः ।

बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥८६.८ ॥

ऋषिरुवाच

इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ।

हुङ्कारेणैव तं भस्म सा चकाराम्बिका ततः ॥८६.९ ॥

अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ।

ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥८६.१० ॥

ततो धुतसटः कोपात् कृत्वा नादं सुभैरवम् ।

पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥८६.११ ॥

कांश्चित् करप्रहारेण दैत्यानास्येन चापरान् ।

आक्रम्य चाधरेणान्यान् स जघान महासुरान् ॥८६.१२ ॥

केषाञ्चित् पाटयामास नखैः कोष्ठानि केसरी ।

तथा तलप्रिहारेण शिरांसि कृतवान् पृथक् ॥८६.१३ ॥

विच्छिन्नबाहुशिरसः सृतास्तेन तथापरे ।
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥८६.१४ ॥
क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ।
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥८६.१५ ॥
श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ।
बलं च क्षयितं कृत्स्त्रं देवीकेसरिणा ततः ॥८६.१६ ॥
चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ।
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥८६.१७ ॥
हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ ।
तत्र गच्छत गत्वा च सा समानीयतां लघु ॥८६.१८ ॥
केशेष्वाकृष्य बद्धा वा यदि वः संशयो युधि ।
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥८६.१९ ॥
तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।
शीघ्रमागम्यतां बद्धा गृहीत्वा तामथाम्बिकाम् ॥८६.२० ॥
इति श्रीमार्कण्डेयमहापुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
धूम्रलोचनवधो नाम षडशीतितमोऽध्यायः

87(84)

सप्तशीतितमाध्यायः- ८७

ऋषिरुवाच

आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।

चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥८७.१ ॥

ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ।

सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥८७.२ ॥

ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ।

आकृष्टचापासिधरास्तथान्ये सत्समीपगाः ॥८७.३ ॥

ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति ।

कोपेन चास्या वदनं मषीवर्णमभूत्तदा ॥८७.४ ॥

भ्रुकुटीकुटिलात्तस्या ललाटफलकाद् द्रुतम् ।

काली करालवदना विनिष्क्रान्तासिपाशिनी ॥८७.५ ॥

विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।

द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥८७.६ ॥

अतिविस्तारवदना जिह्वाललनभीषणा ।

निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥८७.७ ॥

सा वेगेनाभिपतिता घातयन्ती महासुरान् ।

सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥८७.८ ॥

पार्ष्णिग्राहाङ्कुशग्राहि योधघण्टासमन्वितान् ।

समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥८७.९ ॥

तथैव योधं तुरगै रथं सारथिना सह ।

निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम् ॥८७.१० ॥

एकं जग्राह केशेषु ग्रीवायामथ चापरम् ।

पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ॥८७.११ ॥

तैर्मुक्तानि च शस्त्रणि महास्त्राणि तथासुरैः ।

मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥८७.१२ ॥

बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ।

ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥८७.१३ ॥

असिना निहताः केचित्केचित्खट्वाङ्गताडिताः ।

जग्मुर्विनाशमसुरा दन्ताग्राभिहता रणे ॥८७.१४ ॥

क्षणेन तन्महासैन्यमसुराणां निपातितम् ।

दृष्ट्वा चण्डोऽभिमैर्भोमाक्षीं तां महासुरः ॥८७.१५ ॥

शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ।

छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥८७.१६ ॥

तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ।

बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥८७.१७ ॥

ततो जहासातिरुषा भीमं भैरवनादिनी ।

काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥८७.१८ ॥

उत्थाय च महासिंहं देवी चण्डमधावत ।

गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥८७.१९ ॥

छिन्ने शिरसि दैत्येन्द्रश्चक्रे नादं सुभैरवम् ।

तेन नादेन महता त्रासितं भुवनत्रयम् ॥८७.२० ॥

अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ।

तमप्यपातयद् भूमौ सा खड्गाभिहतं रुषा ॥८७.२१ ॥

हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।

मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥८७.२२ ॥

शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ।

प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ॥८७.२३ ॥

मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ।

युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥८७.२४ ॥

ऋषिरुवाच

तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ।

उवाच कालीं कल्याणी ललितं चण्डिका वचः ॥८७.२५ ॥

श्रीदेव्युवाच

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।

चामुण्डेति ततो लोके ख्याता देवि भविष्यसि ॥८७.२६ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधोनाम सप्ताशीतितमोऽध्यायः

88(85)

अष्टाशीतितमोऽध्यायः- ८८

ऋषिरुवाच

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।

बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥८८.१ ॥

ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ।

उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥८८.२ ॥

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ।

कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ॥८८.३ ॥

कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ।

शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥८८.४ ॥

कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ।

युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥८८.५ ॥

इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ।
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥८८.६ ॥
आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥८८.७ ॥
स च सिंहो महानादमतीव कृतवान् नृप ।
घण्टास्वनेन तन्नादमम्बिका चाप्यबृंहयत् ॥८८.८ ॥
धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ।
निनादैर्भीषणैः काली जिग्ये विस्तारिताननना ॥८८.९ ॥
तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ।
देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥८८.१० ॥



वामे शिवेन एवं दक्षे गणेशेन परिवृताः सप्तमातृकाः ।



ब्राह्मी मातृका



कौमारी मातृका

एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ।

भवायामरसिंहानामतिवीर्यबलान्विताः ॥८८.११ ॥

ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।

शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥८८.१२ ॥

यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।

तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥८८.१३ ॥

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।

आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥८८.१४ ॥

माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।

महाहिवलया प्राप्ता चन्द्रलेखाविभूषणा ॥८८.१५ ॥

कौमारी शक्तिहस्ता च मयूरवरवाहना ।

योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥८८.१६ ॥

तथैव वैष्णावी शक्तिर्गरुडोपरि संस्थिता ।

शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥८८.१७ ॥

जज्ञे वाराहमतुलं रूपं या बिभ्रती हरेः ।

शक्तिः साप्यायौ तत्र वाराहीं बिभ्रती तनुम् ॥८८.१८ ॥

नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।

प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥८८.१९ ॥

वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।

प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥८८.२० ॥

ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।

हन्यन्तामसुराः शीघ्रं मम प्रीत्याऽह चण्डिकाम् ॥८८.२१ ॥

ततो देवोशरीरात्तु विनिष्क्रान्तातिभीषणा ।

चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी ॥८८.२२ ॥

सा चाह धूम्रजटिलमीशानमपराजिता ।

दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ॥८८.२३ ॥

ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ।

ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥८८.२४ ॥

त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।

यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥८८.२५ ॥

बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः ।

तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥८८.२६ ॥

यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ।

शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥८८.२७ ॥

तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ।

अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ॥८८.२८ ॥

ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ।

ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥८८.२९ ॥

सा च तान् प्रहितान् बाणाञ्छूलशक्तिपरश्वधान् ।

चिच्छेद लीलयाऽध्मातधनुर्मुक्तैर्महेषुभिः ॥८८.३० ॥

तस्याग्रतस्तथा काली शूलपातविदारितान् ।

खट्वाङ्गपोथितांश्चारीन् कुर्वती व्यचरत्तदा ॥८८.३१ ॥

कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः ।

ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति ॥८८.३२ ॥

माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ।

दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ॥८८.३३ ॥

ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः ।

पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥८८.३४ ॥

तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ।

वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥८८.३५ ॥

नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान् ।

नारसिंही चचाराजौ नादापूर्णदिगन्तरा ॥८८.३६ ॥

चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ।

पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥८८.३७ ॥

इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ।

दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥८८.३८ ॥

पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान् ।

योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥८८.३९ ॥

रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।

समुत्पतति मेदिन्यां तत्प्रमाणो महासुरः ॥८८.४० ॥

युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।

ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥८८.४१ ॥

कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥८८.४२ ॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥८८.४३ ॥
ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः ।
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥८८.४४ ॥
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ।
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥८८.४५ ॥
वैष्णवी समरे चैनं चक्रेणाभिजघान ह ।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥८८.४६ ॥
वैष्णावीचक्रभिन्नस्य रुधिरस्रावसम्भवैः ।
सहस्रशौ जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥८८.४७ ॥
शक्त्या जघान कौमारी वाराही च तथासिना ।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥८८.४८ ॥
स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् ।
मातः कोपसमाविष्टो रक्तबीजो महासुरः ॥८८.४९ ॥
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥८८.५० ॥
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।

व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥८८.५१ ॥

तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा ।

उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ॥८८.५२ ॥

मच्छस्त्रपातसम्भूतान् रक्तबिन्दून् महासुरान् ।

रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥८८.५३ ॥

भक्षयन्ती चर रणे तदुत्पन्नान् महासुरान् ।

एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ।

भक्षयमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ॥८८.५४ ॥

ऋषिरुवाच

इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ।

मुखेन काली जगृहे रक्तबीजस्य शोणितम् ॥८८.५५ ॥

ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ।

न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ॥८८.५६ ॥

तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ।

यतस्ततः स्ववक्त्रेण चामुण्डा सम्प्रतीच्छति ॥८८.५७ ॥

मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ।

तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ॥८८.५८ ॥

देवी शूलेन चक्रेण बाणैरसिभिरृष्टिभिः ।

जघान रक्तबीजं तं चामुण्डापीतशोणितम् ॥८८.५९ ॥

स पपात महीपृष्ठे शस्त्रसंहतितो हतः ।
नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥८८.६० ॥
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ।
तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥८८.६१ ॥
इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
रक्तबीजवधोनामाष्टाशीतितमोऽध्यायः

89(86)

एकोननवतितमोऽध्यायः- ८९

राजोवाच
विचित्रमिदमाख्यातं भगवन् भवता मम ।
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥८९.१ ॥
भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ।
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ॥८९.२ ॥
ऋषिरुवाच
चकार कोपमतुलं रक्तबीजे निपातिते ।
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥८९.३ ॥

हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ।

अभ्यधावन्निशुम्भोऽथ मुख्ययासुरसेनया ॥८९.४ ॥

तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ।

संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥८९.५ ॥

आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ।

निहन्तुं चण्डिकां कोपात्कृताव युद्धं तु मातृभिः ॥८९.६ ॥

ततो युद्धमतीवासीद्देव्या शुम्भनिशुम्भयोः ।

शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥८९.७ ॥

चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः ।

ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ॥८९.८ ॥

निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ।

अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥८९.९ ॥

निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ।

अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥८९.१० ॥

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ।

तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥८९.११ ॥

कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ।

आयातं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥८९.१२ ॥

अथादाय गदां सोऽपि चिक्षेप चण्डिकां प्रति ।

सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥८९.१३ ॥

ततः परशुहस्तं तमायान्त दैत्यपुङ्गवम् ।

आहत्य देवी बाणौघैरपातयत भूतले ॥८९.१४ ॥

तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ।

भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् ॥८९.१५ ॥

स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ।

भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥८९.१६ ॥

तमायान्तं समालोक्य देवी शङ्खमवादयत् ।

ज्याशब्दं चापि धनुषश्चकारातीव दुः सहम् ॥८९.१७ ॥

पूरयामास ककुभो निजघण्टास्वनेन च ।

समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥८९.१८ ॥

ततः सिंहो महानादैस्त्याजितेभमहामदैः ।

पूरयामास गगनं गां तथैव दिशो दश ॥८९.१९ ॥

ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ।

कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥८९.२० ॥

अट्टाट्टहासमशिवं शिवदूती चकार ह ।

तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥८९.२१ ॥

दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ।

तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥८९.२२ ॥

शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ।

आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥८९.२३ ॥

सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ।

निर्घातनिःस्वनो घोरो जितवानवनीपते ॥८९.२४ ॥

शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् ।

चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥८९.२५ ॥

ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ।

स तदाभिहतो भूमौ मूर्च्छितो निपपात ह ॥८९.२६ ॥

ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः ।

आजघान शरैर्देवीं कालीं केसरिणं तथा ॥८९.२७ ॥

पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ।

चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ॥८९.२८ ॥

ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ।

चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥८९.२९ ॥

ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् ।

अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥८९.३० ॥

तस्यापतत एवाशु गदां चिच्छेद चण्डिका ।

खड्गेन शितधारेण स च शूलं समाददे ॥८९.३१ ॥

शूलहस्तं समायान्तं निशुम्भममरार्दनम् ।

हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥८९.३२ ॥

भिन्नस्य तस्य शूलेन हृदयान्निः सृतोऽपरः ।

महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥८९.३३ ॥

तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ।

शिरश्चिच्छेद खड्गेन ततोऽसावपतद् भुवि ॥८९.३४ ॥

ततः सिंहश्चखादोग्रं दंष्ट्राक्षुण्णशिरोधरान् ।

असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥८९.३५ ॥

कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ।

ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥८९.३६ ॥

माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ।

वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥८९.३७ ॥

खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ।

वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ॥८९.३८ ॥

केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ।

भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥८९.३९ ॥

इति श्रीमार्कण्डेयमहापुराणे सावर्णिके मन्वन्तरे देवीमाहत्म्ये

निशुम्भवधोनाम एकोननवतितमोऽध्यायः

90(87)

नवतितमोऽध्यायः- ९०

ऋषिरुवाच

निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसंमितम् ।

हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥९०.१ ॥

बलावलेपाद् दुष्टे त्वं मा दुर्गे गर्वमावह ।

अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी ॥९०.२ ॥

श्रीदेव्युवाच

एकैवाहं जगत्यत्र द्वितीया का ममापरा ।

पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥९०.३ ॥

ऋषिरुवाच

ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ।

तस्या देव्यास्तनौ जग्मुरेकावासीत्तदाम्बिका ॥९०.४ ॥

श्रीदेव्युवाच

अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ।

सत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥१०.५ ॥

ऋषिरुवाच

ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ।
पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥१०.६ ॥
शरवर्षैः शितैः शस्त्रैस्तथा चास्त्रैः सुदारुणैः ।
तयोर्युद्धमभूद् भूयः सर्वलोकभयङ्करम् ॥१०.७ ॥
दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ।
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥१०.८ ॥
मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ।
बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः ॥१०.९ ॥
ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ।
सा च तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥१०.१० ॥
छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ।
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥१०.११ ॥
ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ।
अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥१०.१२ ॥
तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ।

धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥९०.१३ ॥

अश्वांश्च पातयामास रथं सारथिना सह ।

हताश्वः स तदा दैत्यश्छिन्नधान्वा विसारथिः ।

जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ॥९०.१४ ॥

चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ।

तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥९०.१५ ॥

स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ।

देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥९०.१६ ॥

तलप्रहाराभिहतो निपपात महीतले ।

स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥९०.१७ ॥

उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ।

तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥९०.१८ ॥

नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ।

चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् ॥९०.१९ ॥

ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ।

उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥९०.२० ॥

स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ।

अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ॥९०.२१ ॥

तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ।

जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥९०.२२ ॥

स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ।

चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥९०.२३ ॥

ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ।

जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥९०.२४ ॥

उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ।

सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥९०.२५ ॥

ततो देवगणाः सर्वे हर्षनिर्भमानसाः ।

बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः ॥९०.२६ ॥

अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ।

ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥९०.२७ ॥

जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः ।

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुम्भवधोनाम नवतितमोऽध्यायः

About this digital edition

The following users contributed to this book:

- Puranastudy
- Шантира Шани
- BrooklynMuseumBot
- CAPTAIN MEDUSA
- Ms Sarah Welch

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium